# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा - शास्त्रीप्रथम, सेमेस्टर-१** | **प्रश्नपत्रम् - ६** | **गुणाः - ७०** |
| **विषयः - पुराणेतिहासः** | **कोड - CC-1.1.2** | **समयः - ०३-०६** |
| **दिनाङ्कः - १०.१२.२०१६** | **ग्रन्थः** - *वाल्मीकीयरामायणे सुन्दरकाण्डः (१ तः ३४ सर्गाः)* | |

---

### प्रथमान्वितिः ( युनिट - १ )

**प्रश्नः १ कयोश्चि द्वयोः ससन्दर्भं व्याख्या कार्या । ०८**

(१) *दुष्करं निष्प्रतिद्वन्द्वं चिकीर्षन् कर्म वानराः ।*
*समुदग्रशिरोग्रीवो गवां पतिरिवाबभौ ॥*

(२) *योजनानां शतं श्रीमांस्तीर्त्वाप्युत्तमविक्रमः ।*
*अनिःश्वसन् कपिस्तत्र न ग्लानिमधिगच्छति ॥*

(३) *चन्द्रोऽपि साचिव्यमिवास्य कुर्व*
*स्तारागणैर्मध्यगतो विराजान् ।*
*ज्योत्स्नावितानेन वितत्य लोका-*
*नुत्तिष्ठतेऽनेकसहस्त्ररश्मिः ॥*

**प्रश्नः २ ( १ ) ग्रन्थोक्तदिशा श्रीरामचन्द्रस्य गुणकीर्तनं लिखत ०८**

*अथवा*

*(२) सुन्दरकाण्डोक्तदिशा हनुमच्चरित्रं वर्णयत ।*

**प्रश्नः ३ अधस्तनेषु द्वयोः टिप्पणी विधेया । ०४**

*(१) ग्रन्थोक्तादिशा लङ्कापुरी वर्णनम् ।*
*(२) अशोकवाटिकास्थिताया: सीतायाः अवस्थावर्णनम् ।*
*(३) रावणप्रासादम् ।*

**प्रश्नः ४ पञ्चानामुत्तराणि देयानि । ०५**

(१) *वैदूर्यमणिः शब्दस्य कोऽर्थः ?*
(२) *शत्रुकर्षणः कः ?*
(३) *रावणस्य पितुः नाम किम् ?*
(४) *रावणस्य इष्टदेवः कः ?*
(५) *समुद्रं वरुणालयं कः तितीर्षति ?*
(६) *पुष्पकविमानं केन रचितम् ?*
(७) *शङ्खप्रभं कस्य विशेषणम् ?*

### द्वितीयान्वितिः ( युनिट - २ )

**प्रश्नः ५ अधोलिखितेषु कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या ०८**

(१) *सम्परिक्रम्य हनुमान् रावणस्य निवेशनान् ।*
*अदृष्टा जानकीं सीतामब्रवीद् वचनं कपिः ॥*

(२) *स मुहूर्तमिव ध्यात्वा मनसा चाधिगम्य ताम् ।*
*अवप्लुतो महातेजाः प्राकारं तस्य वेश्मनः ॥*

(३) स वीक्षमाणस्तत्रस्तो मार्गमाणश्च मैथिलीम् ।
अवेक्षमाणश्च महीं सर्वांतामन्ववैक्षत ॥

**प्रश्नः ६ कस्याप्येकस्योत्तरं विस्तरेण दीयताम् ।** ०७

(१) लङ्कापुरीवर्णनम् ।

(२) सीतारावणयोः संवादः ।

(३) हनुमतः सीतान्वेषणोद्योगं वर्णयत ।

**प्रश्नः ७ अधोलिखितेषु पञ्चानामुत्तराणि देयानि ।** ०५

(१) सुन्दरकाण्डे कति सर्गाः ?

(२) शास्त्रीप्रथमवर्षे प्रथमसत्रे कति सर्गाः निश्चिताः ?

(३) गृध्रराजः कः ?

(४) पद्मपत्रनिभेक्षणं वक्त्रं रामस्य अन्यस्य वा ?

(५) किष्किन्धापुरी कस्य निवासस्थानम् ?

(६) कः मुहूर्तमिव ध्यानं चकार ?

(७) रामायणे कति काण्डाः वर्तन्ते ?

## तृतीयान्वितिः ( युनिट – ३ )

**प्रश्नः ८ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

(१) निष्क्रान्ते राक्षसेन्द्रे तु पुनरन्तः पुरं गते ।
राक्षस्यो भीमरुपास्ताः सीतां समभिदुद्रुवः ॥

(२) नहि मे जीवितेनार्थो नैवार्थैर्न च भूषणैः ।
वसन्त्या राक्षसीमध्ये विना रामं महारथम् ।

(३) धन्या देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
मम पश्यन्ति ये वीरं रामं राजीवलोचनम् ॥

**प्रश्नः ९ एकस्य समीक्षा विधेया ।** ०८

(१) महर्षिवाल्मीकिः आदिकविः ।

(२) सीतावियोगी श्रीरामस्य मनोदशा विवेचनीया ।

**प्रश्नः १० एकस्य टिप्पणी लेख्या ।** ०४

(१) सीतायाः शुभशकुनानि ।

(२) सीतायाः तर्कवितर्काः ।

(३) त्रिजटायाः स्वप्नः ।

**प्रश्नः ११ अधोलिखितासु पञ्चानामुत्तराणि देयानि ।** ०५

(१) ''न मानुषी राक्षसस्य भवितुमर्हति भार्या'' कस्याः वचनम् ?

(२) अरुन्धती कस्य ऋषेः भार्या ?

(३) जनकात्मजा का ?

(४) पुराणस्य किं लक्षणम् ?

(५) रामायणशब्दस्य कोऽर्थः ?

(६) ''प्रघसा'' राक्षसी उत वा देवता ?

(७) ''शूर्पणखा'' कस्य भगिनी ?

(८) अहं सुग्रीवसचिवः कः उक्तवान् ?

=०=